# Shri Kamakhya Ashtottarashatanama Stotram

# શ્રીકામાખ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Kamakhya AshTottarashatanama Stotram

File name : kAmAkhyAShTottarashatanAmastotram.itx

Category : devii, devI, aShTottarashatanAma

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Description/comments : From the library of Kamakhya temple. See corresponding nAmAvaliH

Latest update : June 14, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 14, 2026

*sanskritdocuments.org*

# શ્રીકામાખ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

વિનિયોગઃ ।
ૐ અસ્ય શ્રીકામાખ્યાષ્ટોત્તરશતનામસ્તોત્રસ્ય મત્સ્યઋષિઃ, અનુષ્ટુપ્
છન્દઃ, શ્રીકામકાલિકા-કામાખ્યા દેવતા, ક્ષ્રૌં બીજમ્, ત્રીં શક્તિઃ,
ક્લીં કીલકમ્, શ્રીકામાખ્યાપ્રીત્યર્થં સર્વાભીષ્ટસિદ્ધ્યર્થં ચ
પાઠે જપે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ ।
ૐ મત્સ્યઋષયે નમઃ શિરસિ ।
ૐ અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
ૐ શ્રીકામકાલિકા-દેવતાયે નમઃ હૃદિ ।
ૐ ક્ષ્રૌં બીજાય નમઃ ગુહ્યે ।
ૐ ત્રીં શક્તયે નમઃ પાદયોઃ ।
ૐ ક્લીં કીલકાય નમઃ નાભૌ ।
ૐ વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

ધ્યાનમ્ ।
રક્તામ્બરાં રક્તમાલાં રક્તગન્ધાનુલેપનામ્ ।
કામકોટિસ્થિતાં દેવીં ધ્યાયેત્ કામેશ્વરીં પરામ્ ॥ ૧॥

રક્તપદ્માસના દેવીં રક્તાભરણભૂષિતામ્ ।
ત્રિનેત્રાં વરદાં વન્દે કામાખ્યાં કામદાં શિવામ્ ॥ ૨॥

અથ સ્તોત્રમ્ ।
ૐ કામાખ્યા કામદા કાન્તા કામરૂપપ્રદાયિની ।
કામેશ્વરી કામરતા કામિની કામદાયિની ॥ ૧॥

કામાતુરા કામકલા કામકોટિસ્વરૂપિણી ।
કામાદિનાશિની ચૈવ કામધેનુસ્વરૂપા ચ ॥ ૨॥

કુબ્જિકા ચ કિશોરી ચ કાલિન્દી કામસુન્દરી ।
કૌશિકી સાધિકા ચૈવ ગર્ભવિશાલિની સદા ॥ ૩॥

વિશ્વયોનિર્જગત્પ્રસૂસ્તન્ત્રવિદ્યા મન્ત્રેશ્વરી ।
યન્ત્રવિદ્યા કૌલાચારપ્રિયા કુમુન્દી કાલિકા ॥ ૪॥

કામાક્ષી કામરૂપપ્રવેશિની નીલા નીલાઞ્જિની ।
પીતા સુમુખી ષણ્મુખી ચ ષોડશી શ્રીજિકા તથા ॥ ૫॥

સિદ્ધા સિદ્ધાશ્રમસ્થા ચ દુર્ગા ચોમા ચ પાર્વતી ।
શારદા હરાદા લક્ષ્મીર્વાણી મહામાયા ચ સા ॥ ૬॥

શ્રીવિદ્યા લલિતામ્બિકા ક્લીઙ્કારા મન્ત્રરૂપિણી ।
આદ્યા આદ્યકાલિકા ચ તિથિમુહૂર્તદાયિની ॥ ૭॥

નક્ષત્રરૂપિણી જ્યોત્સ્ના પ્રાગ્જ્યોતિષિણી યોગિની ।
પર્વતસ્થા નીલકૂટનિવાસિની શિવરૂપિણી ॥ ૮॥

યોનિમણ્ડલસંસ્થા ચ રામા રાસેશ્વરી પરા ।
પરાપરા પરજ્યોતિઃ પરબ્રહ્મકુટુમ્બિની ॥ ૯॥

દશભુજા ચતુર્ભુજા નાનાસ્ત્રવિભૂષિતા ।
ત્રિજટા ચૈકજટા ચ બલિહોમપ્રિયા સદા ॥ ૧૦॥

ડાકિની હાદિવિદ્યા ચ સાદિઃ શકુનિકા તથા ।
કાદિઃ કકારવિદ્યા ચ તન્ત્રેશ્વરસુપૂજિતા ॥ ૧૧॥

શૂલિની વિપરીતચિત્તા પ્રત્યઙ્ગિરા ચ કૃત્યા ।
યોગવિદ્યા યોનિમુદ્રાપ્રતિષ્ઠિતા વિશ્વરૂપા ॥ ૧૨॥

જગત્કર્ત્રી ચ ભોક્ત્રી ચ સંહારિણી ચ યોગિની ।
ગોરક્ષપૂજિતા સૌમ્યા કુલ્લુકા મુકુન્દા સતી ॥ ૧૩॥

માતૃકા વ્યઞ્જના શબ્દધ્વનિઃ પ્રણવનાદિની ।
નાદાત્મિકા ભૈરવી ચ ત્રિપુરાપીઠગામિની ॥ ૧૪॥

મહાપીઠનિવાસિની કામાઙ્ગિ કામરૂપગા ।
સર્વવિદ્યામયી ચૈવ પરાશક્તિઃ પ્રકીર્તિતા ॥ ૧૫॥

ફલશ્રુતિઃ ।
અષ્ટોત્તરશતં નામ્નાં કામખ્યાયાસ્તુ યઃ પઠેત્ ।

તસ્ય સર્વાર્થાસિદ્ધિઃ સ્યાન્નાત્ર કાર્યા વિચારણા ॥ ૧૬॥

અષ્ટોત્તરશતં નામ્નાં પુરશ્ચર્યાવિધિઃ સ્મૃતઃ ।
સહસ્રજપમાત્રેણ મન્ત્રસિદ્ધિઃ પ્રજાયતે ॥ ૧૭॥

યઃ પઠેચ્છૃણુયાન્નિત્યં ભક્તિભાવેન ચેતસા ।
તસ્ય રાજ્યં ચ સૌભાગ્યં લક્ષ્મીશ્ચાચલગામિની ॥ ૧૮॥

દુર્ગેષુ વિષમે ઘોરે સઙ્કટે સમુપસ્થિતે ।
ઇદં સ્તોત્રં સ્મરેદ્યસ્તુ તસ્ય રક્ષાં કરોતિ સા ॥ ૧૯॥

બન્ધને શત્રુનાશાય મહાવ્યાધિપ્રશાન્તયે ।
મારણોચ્ચાટનાદીનાં સ્તમ્ભને ચાપિ સિદ્ધિદમ્ ॥ ૨૦॥

યેઽપિ વાઞ્છન્તિ સન્તાનં વિદ્યાં વા ધર્મમુત્તમમ્ ।
કામાખ્યાયાઃ પ્રસાદેન તે લભન્તે ન સંશયઃ ॥ ૨૧॥

તન્ત્રં મન્ત્રં ચ યન્ત્રં ચ યત્કિઞ્ચિત્સિદ્ધિકામ્યયા ।
ઇદમેવ પઠેદ્વિદ્વાનન્યથા વિફલઃ શ્રમઃ ॥ ૨૨॥

પ્રાતઃકાલે પઠેદ્યસ્તુ સ ભવેચ્છ્રીપતિઃ સદા ।
સન્ધ્યાકાલે પઠેદ્યસ્તુ શત્રું સંહરતે દ્રુતમ્ ॥ ૨૩॥

યોનિમણ્ડલમધ્યસ્થાં ધ્યાત્વા દેવીં જપેદિદમ્ ।
સાક્ષાત્કામાખ્યારૂપાઽસૌ ભવત્યેવ ન સંશયઃ ॥ ૨૪॥

રાજદ્વારે જયેત્સર્વં વિવાદે વિજયં લભેત્ ।
સર્વં ચ વશમાનયેત્ત્રૈલોક્યં સચરાચરમ્ ॥ ૨૫॥

ન ભયં ચૌરતો નાસ્તિ ન ભયં રાજતોઽપિ ચ ।
ન ભયં ભૂતપ્રેતાનાં સ્તોત્રસ્યાસ્ય પ્રભાવતઃ ॥ ૨૬॥

અરણ્યે વા શ્મશાને વા પર્વતે વા નિશામુખે ।
જપન્સિદ્ધિં લભેચ્છીઘ્રં કામરૂપેતિ વિશ્રુતામ્ ॥ ૨૭॥

નાસ્તિ સદ્યઃ પરં મન્ત્રં નાસ્તિ સદ્યઃ પરં ફલમ્ ।
અષ્ટોત્તરશતં નામ્નાં કામખ્યાયાઃ પ્રપઠ્યતે ॥ ૨૮॥

યઃ પઠેદષ્ટોત્તરં નામ્નાં દેવીં ધ્યાત્વા ચ તન્મયીમ્ ।
તસ્ય પાદે જગત્સર્વં કામરૂપા પ્રદાસ્યતિ ॥ ૨૯॥

ઇતિ શ્રીકામાખ્યાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Durga Sharma

*Shri Kamakhya Ashtottarashatanama Stotram*
pdf was typeset on June 14, 2026

Please send corrections to *sanskrit@cheerful.com*